नमः श्रीदक्षिणकालिकायै नमः
श्रीभैरवउवाच ॥ कालीपूजा श्रुता नाथ भावश्च विविधाः
प्रभो ॥ इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितं ॥ १ ॥ त्व
मेव शरणं नाथ त्राहि मां दुःखसंकटात् ॥ २ ॥ भैरव उ
वाच ॥ रहस्यं शृणु वक्ष्यामि भैरवि प्राणवल्लभे ॥ ३ ॥ श्री
जगन्मंगलं नाम कवचं मंत्रविग्रहं ॥ पठित्वा धारयित्वेदं
त्रैलोक्यं मोहयेत्क्षणात् ॥ ४ ॥ नारायणोपि यद्धृत्वा ना

Acc. No. ~~2634~~ M1488
Title - जगन्मङ्गलकवचम् (दक्षिणकालिककवच) (संपूर्ण)
Author - ~~भैरवतन्त्रे~~ पाठक
Date - ?
Subject - स्तोत्र
folio - 6
xerox - 6

रीं भूत्वा महेश्वरं ॥ योगेन्द्राक्षोभमनय घत्वापदिरभूद्गुरुः
॥ वरं द्रसानूज घानेवरावणादि निद्राचरान् ॥ यस्य प्र
सादादीन्द्राणं त्रैलोक्यं विजयो विभु ॥ ५ ॥ धनाधिपः कुबे
रोपि सुरेन्द्रो भूष्ठ चीपतिः ॥ एवं हि सकला देवाः सर्वास्त
द्धिश्वराः प्रिये ६ श्रीजगन्मंगलस्यास्य कवचस्य ऋषिः
शिवः ॥ छंदोनुष्टुप्देवता च दक्षिणकालिकेरिता ॥ ७ ॥
जगतां मोहने दुष्ट विजये भुक्ति मुक्तिषु ॥ योषिताकर्षणे चै

॥ २ ॥

व विनियोगः प्रकीर्तितः ॥ ८ ॥ शिरो मे कालिका पातु क्रीं
कार्य्येकाक्षरी परा क्रीं क्रीं क्रीं मे ललाटे तु कालिका ख
ड्गधारिणी हूं हूं पातु नेत्रयुग्मं ह्रीं ह्रीं पातु श्रुती मम ॥ द
क्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी ॥ १० ॥ क्रीं क्रीं क्रीं
रसनां पातु हूं हूं पातु कपोलके ॥ वदनं सकलं पातु ह्रीं ह्रीं
स्वाहास्वरूपिणी ॥ ११ ॥ द्वाविंशत्यक्षरी स्कंधौ महाविद्या
खिलप्रदा ॥ खड्गमुंडधरा काली वरदाभयपाणिना ॥ वि

॥ २ ॥

द्याभिः सकलाभिश्च सर्वांगमभितोवतु ॥ १२ ॥ क्रीं हूं ह्रीं
त्र्यक्षरीपातु चामुंडा हृदयं मम ॥ ऐं हूं ओं ऐं स्तनद्वंद्वं ह्रीं
फट् स्वाहा ककुत्स्थले ॥ १३ ॥ अष्टाक्षरी महाविद्या भुजौ
पातु सकर्तृकां ॥ क्रीं क्रीं हूं हूं ह्रीं ह्रीं मम करौ पातु षडक्षरा
१४ क्रीं नाभिमध्यदेशो च दक्षिणे कालिकेवतु ॥ क्रीं क्रीं
स्वाहा पातु गुह्ये च कालिके काद्दशाक्षरी ॥ १५ ॥ हूं ह्रीं क्रीं
दक्षिणे कालिके हूं ह्रीं पातु कटिद्वयं ॥ कालीदशाक्षरी

॥ ३ ॥

विद्यास्वाहांतेरूरुयुग्मकं ॥ १६ ॥ ॐ ह्रीं क्रीं मे स्वाहा पा
तु जानुनी कालिका सदा ॥ १७ ॥ कालीतुनाम विद्येयं
चातुर्वर्गफलप्रदा ॥ १७ ॥ क्रीं हूं ह्रीं पातु सा गुल्फं दक्षि
णे कालिकेवतु ॥ क्रीं हूं ह्रीं स्वाहा पादं पातु चतुर्दशाक्ष
री मम ॥ १८ ॥ खड्गमुंडधरा काली वरदाभयपाणिना ॥ वि
द्याभिः सकलाभिश्च सर्वांगमभितोवतु ॥ १९ ॥ काली क
पालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥ विप्रचित्ता तथो

॥ ३ ॥

ओग्र: प्रमादीसा घन त्विषा ॥ २० ॥ नीला घना बलाका च माया मुद्रामिता श्रिता ॥ एता: सर्वा: खड्गहस्ता मुंड माला विभूषिता: ॥ २१ ॥ रक्षंतु दिग्विदिक्षु मां ब्राह्मा ना रायणी तथा ॥ माहेश्वरी च चामुंडा कौमारी चापराजिता ॥ २२ ॥ वाराही नारसिंही च सर्वाश्चामित भूषणा: ॥ रक्षं तु स्वायुधैर्दिक्षु विदिक्षु मां यथा तथा ॥ २३ ॥ इति ते क थितं दिव्यं कवचं परमाद्भुतं ॥ श्रीजगन्मंगलेनाम म

हाविद्यौघविग्रहं ॥ २४ ॥ त्रैलोक्याकर्षकं ब्रह्मकवचं मन्मु खोदितम् ॥ गुरुपूजां विधायाथ विधिवत्प्रपठेन्नर: ॥ २५ ॥ क वचं त्रि:सहस्रकापी जावजीवंति मानवा: ॥ एतच्छतार्धमा वृत्य त्रैलोक्य विजयी भवेत् ॥ २६ ॥ त्रैलोक्यं क्षोभयत्येव क वचस्य प्रसादत: ॥ महाकविर्भवेत्साक्षात्सर्वसिद्धीश्वरो भवेत् ॥ २७ ॥ पुष्पांजली कालिकाये मूलेनैव पठेत्सकृ त् ॥ शतवर्षसहस्राणां पूजाया फलमाप्नुयात् ॥ २८ ॥ भूर्जे

विलिखितं चैव तत्स्वर्णस्थं धारयेद्यदि ॥ स्त्रिरवायां
दक्षिणे बाहौ कंठे वा धारयेद्ध्रुवं ॥ २८ ॥ त्रैलोक्यमोहये
क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात् ॥ पुत्रवान्धनवान्
श्रीमान्नानाविद्यानिधीर्भवेत् ॥ ३० ॥ ब्रह्मास्त्रादीनि
शस्त्राणि तद्गात्रस्पर्शनात्तः ॥ नासामायांति याना
री वंध्या चमृतपुत्रिणी ॥ ३१ ॥ अजपत्या च या नारी मृत
वत्सा च या भवेत् ॥ कंठे वा वामबाहौ वा कवचस्य विधार

५

णात् ॥ ३२ ॥ बहुपत्या जीववत्सा भवत्येव न संशयः ॥ न दे
यं परशिष्येभ्यो भक्तेभ्योपि विशेषतः ॥ ३३ ॥ शिष्येभ्यो भक्ते
मुक्तेभ्यश्चान्यथा मृत्युमाप्नुयात् ॥ स्पर्धास्पर्धे च कम
ले वा गेहे वा मंदिरे सुखे ॥ ३४ ॥ पोत्रं तस्यैमास्थाय निवस
स्येव निश्चितं ॥ इदं कवचमज्ञात्वा यो जपेत्परघोरदक्षिणं
॥ ३५ ॥ शतलक्षं प्रजप्तापि तस्य विधा न सिद्ध्यति ॥ स
शस्त्रघातमाप्नोति सो चिरान्मृत्युमाप्नुयात् ॥ ३६ ॥ इ

५